३ पत्नाटः ४ निष्कुटः ५। इति त्रिकाण्डशेषः ॥

वासिः, पुं, (वसनिवासे+"वसिवपियजिराजीति।"उणा० ४।१२४। इति इञ्। कुठारभेदः। वाइस इति भाषा। इत्युणादिकोषः ॥

वासिका, स्त्री, (वासैव। स्वार्थे कन्। टाप्। अत इत्वञ्च।) वासकः। इति शब्दरत्नावली ॥

वासितं, क्ली, (वास्यते स्मेति। वास+क्तः।) रुतम्। इति मेदिनी। ते, १५२ ॥ ज्ञानमात्रम्। इति हेमचन्द्रः ॥ खगरवः। इति विश्वः ॥

वासितः, त्रि, (वास्यते स्मेति। वासि सुरभीकरणे +क्तः।) सुरभीकृतः। तत्पर्य्यायः। भावितः २। इत्यमरः ॥ द्वे सुगन्धिपुष्पादिवासितद्रव्ये। भाव्यते प्राप्यते भावितं भू क ङ प्राप्तौ कर्म्मणि क्तः। वासं सौरभं करोति इति ण्यन्तात्। कर्म्मणि क्ते वासितम्। इति तट्टीकायां भरतः ॥ जलादौ वासितः। इति शब्दरत्नावली ॥ ख्यातः। वस्त्रवेष्टितः। इति धरणिः ॥

वासिता, स्त्री, (वासयतीति वस निवासे+णिच्+क्तः। टाप्।) स्त्रीमात्रम्। करिणी। इत्यमरः ॥

वासिनी, स्त्री, (वासोऽस्या अस्तीति। वास+इनिः।) शुक्लझिण्टी। इति शब्दचन्द्रिका ॥

वासिष्ठं, क्ली, रुधिरम्। इति हेमचन्द्रः ॥

वासिष्ठं, त्रि, वसिष्ठकृतयोगशास्त्रादि। वसिष्ठेन कृतमित्यादर्थे (अण्) प्रत्ययेन निष्पन्नम् ॥ वसिष्ठसम्बन्धि च ॥

वासी, स्त्री, (वासयतीति वासि अच्। गौरादित्वात् ङीष्।) तक्षणी। वाइस इति ख्यातास्त्रम्। इति त्रिकाण्डशेषः ॥

वासुः, पुं, (सर्व्वोऽत्र वसति सर्व्वत्रासौ वसतीति वा। वस+बाहुलकात् उण्। इति १।१ संख्यक उणादिसूत्रवृत्तौ उज्ज्वलदत्तः।) नारायणः। इति त्रिकाण्डशेषः ॥ श्रीनिवासोऽप्यणो वासुः। इति जटाधरस्य ॥ विश्वरूपः। पुनर्व्वसुः। इत्युणादिकोषः ॥

वासुकिः, पुं, वसुकस्यापत्यमिति। वसुक+इञ्।) अहिपतिः। तत्पर्य्यायः। सर्पराजः २। इत्यमरः ॥ वासुकेयः ३। इति शब्दरत्नावली। तस्योत्पत्तिर्यथा,—

"सुरसा जज्ञिरे सर्पास्तेषां राजा तु तक्षकः।
वासुकिश्चैव नागानां गणाः क्रोधसमोऽधिकः ॥"
इति वह्निपुराणे काश्यपीयवंशः ॥

(जरत्कारुमुनिपत्नी मनसादेवी तु अस्यैव भगिनी।

"आस्तीकस्य मुनेर्माता भगिनी वासुके स्तथा।
जरत्कारुमुनेः पत्नी नागमातर्नमोऽस्तु ते ॥"
इति मनसाप्रणाममन्त्रः ॥)

वासुकेयः, पुं, (वसुकस्यापत्यमिति। वसुक+ढञ्।) वासुकिः। इति शब्दरत्नावली ॥

वासुकेयस्वसा, [ऋ] स्त्री, (वासुकेयस्य वासुकेः स्वसा भगिनी।) मनसादेवी। इत्यमरः ॥

वासुदेवः, पुं, (वसुदेवस्यापत्यमिति। वसुदेव+"ऋष्यन्धकवृष्णिकुरुभ्यश्च।" ४। १। ११४। इति अण्। यद्वा, सर्व्वत्रासौ वसत्यात्मरूपेण विश्वम्भरत्वादिति। वस्+बाहुलकात् उण् वासुः। वासुश्चासौ देवश्चेति कर्म्मधारयः। अस्य नामनिरुक्तिस्तु परतो ज्ञेया।) श्रीकृष्णः। इत्यमरः ॥ तत्पर्य्यायः। वसुदेवभूः २। इति हेमचन्द्रः ॥ सत्यः ३ सुभद्रः ४ वासुभद्रः ५ षड्गजित् ६ षड्बिन्दुः ७ पृश्निशृङ्गः ८ पृश्निभद्रः ९ गदाग्रजः १० मार्जः ११ बभ्रुः १२ लोहिताक्षः १३ परमात्मखङ्गकः १४। इति शब्दमाला ॥ अन्यत् कृष्णशब्दे द्रष्टव्यम् ॥ श्रीकृष्णशरीरस्य नित्यत्वं यथा,—

श्रीसनत्कुमार उवाच।

"भद्रं वो मुनयः शश्वत्तपसां फलमीप्सितम्।
कृष्णस्य कुशलप्रश्नं शिवबीजस्य निष्फलम् ॥
साम्प्रतं कुशलं वश्च दर्शनं परमात्मनः।
भक्तानुरोधाद्देहस्य परस्य प्रकृतेरपि ॥
निर्गुणस्य निरीहस्य सर्व्वबीजस्य तेजसः।
भारावतारणायैव चाविर्भूतस्य साम्प्रतम् ॥

श्रीकृष्ण उवाच।

शरीरधारिणश्चापि कुशलप्रश्नमीप्सितम्।
तत्कथं कुशलप्रश्नं मयि विप्र न विद्यते ॥

सनत्कुमार उवाच।

शरीरे प्राकृते नाथ सन्ततञ्च शुभाशुभम्।
नित्यदेहे क्षेमबीजे शिवप्रश्नमनर्थकम् ॥

श्रीभगवानुवाच।

यो यो विग्रहधारी च स च प्राकृतिकः स्मृतः।
देहो न विद्यते विप्र तां नित्यां प्रकृतिं विना ॥

सनत्कुमार उवाच।

रक्तबिन्दूद्भवा देहास्ते च प्राकृतिकाः स्मृताः।
कथं प्रकृतिनाथस्य बीजस्य प्राकृतं वपुः ॥
सर्व्वबीजस्य सर्व्वादिर्भवांश्च भगवान् स्वयम्।
सर्व्वेषामवताराणां प्रधानं बीजमव्ययम् ॥
त्वां वदन्ति वेदाश्च नित्यं नित्यं सनातनम्।
ज्योतिःस्वरूपं परमं परमात्मानमीश्वरम् ॥
मायया सगुणश्चैव मायेशं निर्गुणं परम्।
प्रवदन्ति च वेदाङ्गास्तथा वेदविदः प्रभो ॥

श्रीकृष्ण उवाच।

साम्प्रतं वासुदेवोऽहं भक्तवीर्य्याश्रितं वपुः।
कथं न प्राकृतो विप्र शिवप्रश्नमभीप्सितम् ॥

सनत्कुमार उवाच।

वासः सर्व्वनिवासश्च विश्वानि यस्य लोमसु।
तस्य देवः परं ब्रह्म वासुदेव इतीरितः ॥
वासुदेवेति तन्नाम वेदेषु च चतुर्षु च।
पुराणेष्वितिहासेषु यात्रादिषु च दृश्यते ॥
रक्तवीर्य्याश्रितो देहः कृते वेदे निरूपितः।
साक्षिणो मुनयश्चात्र धर्म्मः सर्व्वत्र एव हि।
साक्षिणो मम वेदाश्च रविचन्द्रौ च साम्प्रतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८७ अध्यायः ॥

तस्य नामव्युत्पत्तिः।

"सर्व्वत्रासौ समस्तञ्च वसत्यत्रेति वै यतः।
ततः स वासुदेवेति विद्वद्भिः परिगीयते ॥"
इति विष्णुपुराणे १ अंशे २ अध्यायः ॥

अपि च।

"सर्व्वाणि तत्र भूतानि वसन्ति परमात्मनि।
भूतेष्वपि च सर्व्वात्मा वासुदेवस्ततः स्मृतः ॥
खाण्डिक्यजनकायाह पृष्टः केशिध्वजः पुरा।
नामव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः ॥
भूतेषु वसते सोऽन्तर्व्वसन्त्यत्र च तानि यत्।
धाता विधाता जगतां वासुदेवस्ततः प्रभुः ॥"
इति तत्रैव। ६। ५। ८०—८२ ॥*॥

(तथा च महाभारते। ५। ७०। ३।

"वसनात् सर्व्वभूतानां वसुत्वात् देवयोनितः।
वासुदेवस्ततो वेद्यो वृहत्वात् विष्णुरुच्यते ॥")

अस्य अङ्गप्रत्यङ्गमन्त्रा यथा,—

"बीजन्तु वासुदेवस्य पुरैव प्रतिपादितम्।
तदङ्गमन्त्रं राजेन्द्र द्वादशाक्षरमुच्यते ॥
ओँ नमो भगवते वासुदेवाय वै पदम्।
अङ्गमन्त्रं तथैतस्य वासुदेवस्य कीर्त्तितम् ॥
अस्य प्रत्यङ्गरूपन्तु दधिवामनसंज्ञकम्।
तस्य मन्त्रं नरश्रेष्ठ शम्भुना भाषितं शृणु ॥
ओँ नमो विष्णवे पूर्व्वं पदं तस्य प्रकीर्त्तितम्।
पदन्तु सुरपतये चतुर्थ्यन्तं महाबलम् ॥
स्वाहान्तं हृदयासन्नं प्रत्यङ्गं वैष्णवं मतम्।
मन्त्रद्वयन्तु यो वेद बीजं प्रत्यङ्गमन्त्रकम् ॥
स पूषा देवकायस्तु न स भूयोऽभिजायते।
सर्व्वसूत्रतन्त्रोक्तः क्रमो ग्राह्यः प्रपूजने ॥
त्रिषु मन्त्रेषु च बुधो विशेषं शृणु भूपते।
रूपन्तु बीजमन्त्रस्य प्रथमं शृणु भूपते ॥
पूर्णचन्द्रोपमः शुक्लः पक्षिराजोपरिस्थितः।
चतुर्भुजः पीतवस्त्रैस्त्रिभिः संवीतदेहभृत् ॥
दक्षिणोर्द्ध्वे गदां धत्ते तदधो विकचाम्बुजम्।
वामोर्द्ध्वे चक्रमतुल्यं धत्तेऽधः शङ्खमेव च ॥
श्रीवत्सवक्षाः सततं कौस्तुभं हृदि चाद्भुतम्।
धत्ते कक्षे ह्यधो वामे तूणीरं बाणपूरितम् ॥
दक्षिणे कोषगं खड्गं नन्दकं सशरासनम्।
शीर्षे किरीटं सद्योतं कर्णयोः कुण्डलद्वयम् ॥
आजानुलम्बिनीं चित्रां स्वर्णमालां गलस्थिताम्।
दधानं दक्षिणे देवीं श्रियं पार्श्वे तु बिभ्रतम् ॥
सरस्वतीं वामपार्श्वे चिन्तयेदररं हरिम्।
मन्त्रस्य बीजरूपन्तु कथितं तव पार्थिव ॥
द्वादशाक्षरमन्त्रस्य रूपमन्यत् शृणुष्व मे।
नीलोत्पलदलश्यामं तथैव च चतुर्भुजम् ॥
दक्षिणोर्द्ध्वे स्थितं पद्मं गदाचाधः प्रचोदयेत् ॥
वामेऽधश्चक्रमतुलमूर्द्ध्वे शङ्खञ्च बिभ्रतम्।
चिन्तयेदररं देवं सर्व्वमन्यच्च पूर्व्ववत् ॥
अष्टादशाक्षरस्यास्य प्रत्यङ्गस्य च विस्तरम्।
शृणु राजन्नवहितो दारिद्र्यभयभञ्जनम् ॥
पूर्णेन्दुसदृशं कामं शुक्लवस्त्रं विचिन्तयेत्।
करे विचिन्तयेद्वामे पीयूषापूरितं घटम् ॥
दध्यन्नखण्डसंयुक्तं दक्षिणे स्वर्णभाजनम्।
पद्मासनगतं देवं चन्द्रमण्डलमध्यगम् ॥